National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(66): 219-225
© 2026 NJHSR
www.sanskritarticle.com

**बिजेन्द्रसिंहः**
शोधच्छात्रः शिक्षापीठ,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, (केन्द्रीय-विश्वविद्यालयः),
नवदेहली –110016

**डा. भारती कौशलः**
सहायकाचार्या, शिक्षापीठ,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, (केन्द्रीय-विश्वविद्यालयः),
नवदेहली –110016

**Correspondence:**
**बिजेन्द्रसिंहः**
शोधच्छात्रः शिक्षापीठ,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, (केन्द्रीय-विश्वविद्यालयः),
नवदेहली –110016

# मनोवैज्ञानिकसिद्धान्तानां परिप्रेक्ष्ये विद्यार्थिनां समायोजनशैक्षिकोपलब्ध्योः सम्बन्धस्याध्ययनम्

## A Study of the Relation Between Students Adjustment and Academic Achievement from the Perspective of Psychological Theories

**बिजेन्द्रसिंहः, डा. भारती कौशलः**

**DOI:** https://doi.org/10.5281/zenodo.21378401

***सारः***
*शिक्षायाः उद्देश्यं केवलं ज्ञानार्जनपर्यन्तं सीमितं नास्ति, अपितु व्यक्तेः सर्वाङ्गीणविकासस्य सुनिश्चितीकरणमपि भवति। अस्मिन् सन्दर्भे समायोजनम् (Adjustment) एका महत्त्वपूर्णा मनोवैज्ञानिकी प्रक्रिया अस्ति, या व्यक्तिं स्वस्य परिवेशस्य च मध्ये सन्तुलनस्थापनाय साहाय्यं करोति। विद्यार्थीजीवने समायोजनस्य महत्त्वं विशेषतया वर्धते, यतः विद्यालयेन, परिवारेण, सहपाठिसमूहेन तथा व्यापकसामाजिकपरिवेशेन सह तस्य निरन्तरम् अन्तःक्रियात्मकः सम्बन्धः भवति। समुचितं समायोजनं विद्यार्थिनां मानसिकस्वास्थ्यम्, आत्मविश्वासम्, प्रेरणाम्, सामाजिकसहभागितां तथा अधिगमस्य स्तरञ्च प्रभावितं करोति। अपरतः शैक्षिकोपलब्धिः (Educational Achievement) शिक्षायाः सफलतायाः प्रमुखः सूचकः अस्ति, या विद्यार्थिनां अधिगमप्रक्रियया अर्जितं ज्ञानम्, कौशलं दक्षताश्च अभिव्यञ्जयति। प्रस्तुतस्य शोधालेखस्य उद्देश्यं समायोजनस्य शैक्षिकोपलब्धेश्च मध्ये विद्यमानम् अन्तःसम्बन्धं विविधमनोवैज्ञानिकसैद्धान्तिकप्रतिमानानामाधारेण स्पष्टीकर्तुमस्ति। अयं अध्ययनः मुख्यतया वैचारिकविश्लेषणात्मकस्वभावः अस्ति। अस्मिन् मनोविश्लेषणात्मक-व्यवहारवादी-संज्ञानात्मक- मानवतावादी तथा पारिस्थितिकीयसिद्धान्तानाम् आलोकः समायोजनस्य अवधारणायाः परीक्षणं कृतम्। आलेखे प्रतिपादितं यत् समायोजनस्य शैक्षिकोपलब्धेश्च मध्ये सकारात्मकः गतिशीलश्च सम्बन्धः विद्यते। निष्कर्षरूपेण वक्तुं शक्यते यत् स्वस्थं समायोजनं विद्यार्थिनां शैक्षिकसफलतायाः कृते अनिवार्या पूर्वापेक्षा अस्ति। अतः समकालीनशिक्षाव्यवस्थायां तस्य संवर्धनार्थं योजनाबद्धाः प्रयत्नाः करणीयाः।*

**मुख्यशब्दावली** - समायोजनम्, शैक्षिकोपलब्धिः, विद्यालयीयसमायोजनम्, मनोवैज्ञानिकसिद्धान्ताः।

**प्रस्तावना**

मानवजीवनं निरन्तरपरिवर्तनशीलाभिः परिस्थितिभिः परिवेष्टितम् अस्ति। स्वस्य अस्तित्वस्य विकासस्य सफलतायाश्च कृते मनुष्येण ताभिः परिस्थितिभिः सह सामञ्जस्यं स्थापनीयम् भवति। एषः सामञ्जस्यस्थापनप्रक्रियाविशेषः समायोजनम् इति कथ्यते। मनोविज्ञानशास्त्रे समायोजनम् एकं केन्द्रीयं तत्त्वं मन्यते, यतः तत् व्यक्तेः व्यवहारम्, व्यक्तित्वम्, मानसिकस्वास्थ्यं तथा सामाजिकसम्बन्धान् प्रत्यक्षरूपेण प्रभावितं करोति।

शिक्षाक्षेत्रे समायोजनस्य भूमिका अधिकं महत्त्वपूर्णा भवति, यतो हि विद्यार्थिनां जीवनं नानाविधानां चुनौतीनां, अपेक्षाणां तथा अनुभवानां प्रभावेण सञ्चालितं भवति। विद्यालयः केवलं ज्ञानप्रदानस्य केन्द्रं नास्ति, अपितु सः सामाजिकसंस्था अपि अस्ति, यत्र विद्यार्थी विभिन्नपृष्ठभूमिभ्यः आगतानां जनानां सह सम्पर्कं स्थापयति। विद्यालयजीवने तेन अध्यापकानाम् अपेक्षाभिः, सहपाठिनां व्यवहारैः, परीक्षासम्बद्धदबावैः, स्पर्धात्मकपरिवेशेन तथा सामाजिकमानदण्डैः सह स्व अनुकूलयितुं प्रयत्नः क्रियते। एताभिः परिस्थितिभिः सह प्रभावकरूपेण सामञ्जस्यस्थापनस्य क्षमता एव तस्य समायोजनस्तरं निर्धारयति। समायोजनप्रक्रिया केवलं बाह्यपरिस्थितिभिः सह सामञ्जस्यस्थापनपर्यन्ता

न सीमिता, अपितु सा व्यक्तेः आन्तरिकजीवनेन अपि सम्बद्धा भवति। व्यक्तेः आवश्यकताः, आकाङ्क्षाः, भावनाः तथा लक्ष्याणि बहुधा बाह्यपरिस्थितिभिः सह संघर्षं कुर्वन्ति। तादृश्यां स्थितौ व्यक्तिः स्वव्यवहारे तथा दृष्टिकोणे परिवर्तनं करोति। एतदेव परिवर्तनं तस्मै मानसिकसन्तुलनं प्रददाति तथा तस्य व्यक्तित्वविकासे साहाय्यं करोति।

शैक्षिकोपलब्धिः शिक्षाक्षेत्रे सफलतायाः एकः महत्त्वपूर्णः सूचकः मन्यते। सामान्यतया सा परीक्षाफलैः, प्राप्ताङ्कैः, अधिगमोपलब्धिभिः तथा शैक्षिकदक्षताभिः मीयते। किन्तु आधुनिकशिक्षामनोविज्ञानं शैक्षिकोपलब्धिं केवलं प्राप्ताङ्कपर्यन्तां न मन्यते। अद्यतनदृष्टिकोणानुसारं शैक्षिकोपलब्धौ ज्ञानम्, कौशलम्, समस्या-समाधानक्षमता, सृजनात्मकता तथा सामाजिकदक्षताः अपि अन्तर्भवन्ति। दीर्घकालपर्यन्तं एतत् मन्यते स्म यत् शैक्षिकोपलब्धिः मुख्यतया बुद्ध्या अथवा संज्ञानात्मकक्षमतया निर्धार्यते। किन्तु आधुनिकैः अनुसन्धानैः सिद्धं यत् विद्यार्थिनां सफलता केवलं तेषां बौद्धिकयोग्यतायाः परिणामः न भवति, अपितु अनेके मनोवैज्ञानिकाः, सामाजिकाः तथा पर्यावरणीयाः कारकाः अपि तत्र महत्त्वपूर्णां भूमिकां निर्वहन्ति। समायोजनम् अपि तादृशमेव एकं तत्त्वम् अस्ति, यत् विद्यार्थिनां शैक्षिकोपलब्धिं प्रत्यक्षतया परोक्षतया च प्रभावितं करोति।

ये विद्यार्थी विद्यालयेन, परिवारेण तथा समाजेन सह स्वस्थसम्बन्धान् स्थापयितुं समर्थाः भवन्ति, तेषु आत्मविश्वासः, आत्मनियन्त्रणम् तथा उपलब्ध्यभिप्रेरणाया: स्तरः अपेक्षया अधिकः दृश्यते। विपरीततया येषां विद्यार्थिनां समायोजनसम्बद्धाः कठिनताः भवन्ति, तेषु तनावः, चिन्ता, असुरक्षाभावः तथा नैराश्यम् इत्यादयः दोषाः विकसिताः भवितुम् अर्हन्ति, ये तेषां शैक्षिकप्रगतिम् अवरुद्धयन्ति। अतः समायोजनं शैक्षिकोपलब्धिश्च परस्परम् अत्यन्तं सम्बद्धौ स्तः, तथा च विद्यार्थिनां समग्रविकासे उभयोः विशेषं महत्त्वम् अस्ति ।

शैक्षिकोपलब्धेः समायोजनस्य च मध्ये प्रगाढः परस्पराश्रितश्च सम्बन्धः विद्यते। वर्तमानकालेऽयं विषयः अधिकमहत्त्वपूर्णो जातः। वैश्वीकरणस्य, प्रौद्योगिक-विकासस्य, सामाजिक-माध्यमानां, ऑनलाइन-शिक्षणस्य तथा तीव्रस्पर्धायाः प्रभावेण विद्यार्थिनां जीवने अनेका नूतनाः चुनौतयः समुत्पन्नाः सन्ति। विद्यार्थिनः अधुना केवलं शैक्षिकापेक्षाणामेव न, अपितु सामाजिक-भावनात्मक-प्रौद्योगिकपरिवर्तनानामपि सम्मुखीकरणम् कुर्वन्ति। एतादृशेषु परिस्थितिषु समायोजनस्य भूमिका अत्यन्तमहत्त्वपूर्णा भवति। राष्ट्रीय-शिक्षानीतिः 2020 अपि विद्यार्थिनां समग्रविकासे, सामाजिक-भावनात्मक-अधिगमे तथा मानसिकस्वास्थ्ये विशेषं बलं ददाति। एषा नीतिः स्पष्टतया सूचयति यत् शिक्षायाः उद्देश्यं केवलं शैक्षणिकोपलब्धिपर्यन्तं न सीमितं भवेत्, अपितु विद्यार्थिनः जीवनस्य विविधचुनौतीनां सम्मुखीकरणे समर्थान् कर्तुमपि अपेक्षितम्। एतल्लक्ष्यं तदैव साध्यं भवति यदा विद्यार्थिषु स्वस्थसमायोजन-क्षमतायाः विकासः क्रियते।

समायोजनस्य शैक्षिकोपलब्धेश्च सम्बन्धं ज्ञातुं विविधाः मनोवैज्ञानिक-शैक्षिकसिद्धान्ताः महत्त्वपूर्णमाधारं प्रददति। मनोविश्लेषणात्मक-सिद्धान्तः व्यक्तेः आन्तरिकसंघर्षेषु भावनात्मकसन्तुलने च बलं ददाति। व्यवहारवादीसिद्धान्तः पर्यावरणीयपुनर्बलनं अधिगमनानुभवं च महत्त्वपूर्णं मन्यते। संज्ञानात्मकसिद्धान्तः व्यक्तेः चिन्तनप्रक्रियासु मानसिकसंरचनासु च केन्द्रितः अस्ति। मानवतावादीदृष्टिकोणः आत्मविकासम् आत्मसाक्षात्कारं च महत्त्वं ददाति, यदा पारिस्थितिकीयदृष्टिकोणः व्यक्ति-पर्यावरणयोः अन्तःक्रियात्मक-सम्बन्धान् स्पष्टीकरोति। एतेषां सर्वेषां दृष्टिकोणानामध्ययनं अस्मान् अवगन्तुं सहायं करोति यत् समायोजनं कथं विकसितं भवति तथा च तत् विद्यार्थिनां शैक्षिकोपलब्धिं कथं प्रभावितं करोति। एतेन सह एतदपि स्पष्टं भवति यत् समायोजनं बहुआयामिका जटिला च प्रक्रिया अस्ति, यस्याः सम्पूर्णव्याख्या केनापि एकेन सिद्धान्तेन कर्तुं न शक्यते। अस्यैव पृष्ठभूमौ प्रस्तुतः शोधालेखः समायोजनस्य शैक्षिकोपलब्धेश्च अन्तर्सम्बन्धस्य विश्लेषणं प्रमुखमनोवैज्ञानिकसिद्धान्तानामाधारेण कर्तुं प्रयतते। अयं अध्ययनः न केवलं विषयस्य सैद्धान्तिकबोधं समृद्धं करिष्यति, अपितु शिक्षकेभ्यः, शोधार्थिभ्यः, परामर्शदातृभ्यः तथा नीतिनिर्मातृभ्यश्च उपयोगी सिद्धः भविष्यति।

**समायोजनस्य अवधारणा**

समायोजनम् सा प्रक्रिया अस्ति यस्याः माध्यमेन व्यक्तिः स्वकीयावश्यकतानां ताः पूरयितुं समर्थानां परिस्थितीनां च मध्ये सन्तुलनं धारयति। समायोजनं मनोविज्ञानस्य अत्यन्तमहत्त्वपूर्णा अवधारणा अस्ति, या व्यक्ति-पर्यावरणयोः मध्ये सन्तुलनस्थापनस्य प्रक्रियां निरूपयति। सामान्यतया समायोजनस्य तात्पर्यं तेषु प्रयत्नेषु वर्तते, येषां माध्यमेन व्यक्तिः स्वकीयावश्यकतानाम्, इच्छानाम्, आकाङ्क्षाणां तथा सामाजिकापेक्षाणां मध्ये सामञ्जस्यं स्थापयति। एषा गतिशीला निरन्तरप्रवहन्ती च प्रक्रिया अस्ति।

समायोजनम् एका निरन्तरप्रवर्तमाना प्रक्रियाविशेषास्ति, यतः व्यक्तिः तथा तस्य परिवेशः उभौ अपि निरन्तरं परिवर्तशीलौ स्तः। समायोजनस्य सम्बन्धः केवलं बाह्यपरिस्थितिभिः सह न भवति, अपितु तत् व्यक्तेः आन्तरिकमानसिकावस्थया अपि सम्बद्धम् अस्ति। यदा व्यक्तिः स्वावश्यकतानां पर्यावरणीयापेक्षाणां च मध्ये सम्यक् सन्तुलनं स्थापयति, तदा सः मानसिकसन्तोषं सुरक्षिततायाः च अनुभवं करोति। विपरीततया असन्तुलनस्य अवस्थायां तनावः, चिन्ता, अन्तर्द्वन्द्वः तथा नैराश्यं जायन्ते। मनोवैज्ञानिकैः समायोजनस्य विभिन्नदृष्टिकोणैः परिभाषाः प्रदत्ताः सन्ति।

**बोरिंगलैंगफ़ैड-बेल्डमहोदयो अनुसारम्** – समायोजनम् एतादृशी प्रक्रिया वर्तते यया प्रक्रियया प्राणिन: स्वकीया: एवञ्च आवश्यकता : तासाम् आवश्यकतानां सम्पूर्तये या: प्रभावजनिका:परिस्तिथितय: सन्ति ता: सन्तुलयति ।

**गेट्स एवम् अन्यविदुषां मतानुसारम्–** समायोजनम् एका निरन्तरप्रक्रिया अस्ति, यया मानव: स्वव्यवहारे परिवर्तनं करोति। स: स्वस्य वातावरणस्य मध्ये अधिकं सामञ्जस्यपूर्णं सम्बन्धं स्थापयति।

**समायोजनस्य प्रमुखाः विशेषताः**

I. समायोजनं निरन्तरा प्रक्रिया अस्ति — एषा प्रक्रिया जीवनपर्यन्तं प्रवर्तते।

II. एतत् व्यक्तेः पर्यावरणस्य च सम्बन्धितम् अस्ति — समायोजनं केवलं व्यक्तौ परिवर्तनं न, अपितु परिस्थितिभिः सह अनुकूलनमपि अस्ति।

III. एतत् मानसिकस्वास्थ्यस्य आधारः अस्ति — सम्यक् समायोजनं मानसिकसन्तुलनं भावनात्मकस्थैर्यं च प्रददाति।

IV. एतत् सामाजिकदक्षतां वर्धयति — समायोजितः जनः अन्यैः सह स्वस्थसम्बन्धान् स्थापयितुं समर्थः भवति।

V. एतत् व्यक्तित्वविकासे सहायकम् अस्ति — समायोजनं व्यक्तेः आत्मधारणां आत्मविश्वासं च प्रभावितं करोति।

**समायोजनस्य प्रमुखाः आयामाः**

**1.वैयक्तिकसमायोजनम्:** व्यक्तेः स्वयम् आत्मना सह सन्तुलनस्थापनं वैयक्तिकसमायोजनम् इति कथ्यते। अस्मिन् आत्मस्वीकृतिः, आत्मसम्मानः, आत्मनियन्त्रणम् इत्यादयः तत्त्वानि समाविष्टानि भवन्ति।

**2.पारिवारिकसमायोजनम्:** परिवारः व्यक्तेः समाजीकरणस्य प्रथमा एककः अस्ति। परिवारेण सह सकारात्मकाः सम्बन्धाः व्यक्तेः सम्यक् विकासाय, मानसिकशान्तये तथा सामाजिकस्थैर्याय च महत्त्वपूर्णं योगदानं ददति। पारिवारिकसमायोजनं व्यक्तेः पारिवारिककर्तव्य-पालने, परस्परसहकार्ये, प्रेम्णि, सम्मानभावे च आधृतम् भवति। मानसिकस्वास्थ्यं तथा आत्मविश्वासं दृढीकुर्वन्ति।

**3.सामाजिकसमायोजनम्:** समाजस्य मानदण्डानां, मूल्यानां तथा अपेक्षाणां अनुरूपं व्यवहारः सामाजिकसमायोजनस्य सूचकः भवति। विद्यालयजीवने सामाजिकसमायोजनस्य विशेषं महत्त्वम् अस्ति।

**4.विद्यालयीयसमायोजनम्:** विद्यालयीयपरिवेशेन, अध्यापकैः, सहपाठिभिः तथा अधिगमसम्बद्धापेक्षाभिः सह सामञ्जस्यस्थापनं विद्यालयीयसमायोजनम् उच्यते। एतत् शैक्षिकसफलतायाः प्रमुख-निर्धारकेषु अन्यतमं मन्यते।

**5.संवेगात्मकसमायोजनम्:** संवेगानां नियन्त्रणं सन्तुलनं च संवेगात्मकसमायोजनस्य आधारः अस्ति। उच्चसंवेगात्मकसमायोजन-युक्ताः विद्यार्थिनः तनावपूर्णासु परिस्थितिष्वपि प्रभावकरूपेण कार्यं कर्तुं समर्थाः भवन्ति।

**शैक्षिकोपलब्धेः अवधारणा**

शैक्षिकोपलब्धिः(Academic Achievement)- अस्याः तात्पर्यम् एतत् यत् विद्यार्थी विद्यालयीयविषयेषु प्राप्तं ज्ञानं, कौशलं तथा परीक्षासु अर्जिताङ्कान् अभिव्यञ्जयति। शैक्षिकोपलब्धिः शिक्षाप्र-क्रियायाः परिणामस्वरूपं प्राप्तं ज्ञानं, कौशलं, दक्षता उपलब्धयश्च प्रकाशयति। सा कस्यचित् विद्यार्थिनः शैक्षणिकसफलतायाः महत्त्वपूर्णः सूचकः अस्ति। परम्परया शैक्षिकोपलब्धिः परीक्षाफलानां प्राप्ताङ्कानां च आधारेण मीयते स्म। किन्तु आधुनिक-शिक्षामनोविज्ञानस्य अनुसारं शैक्षिकोपलब्धिः व्यापकावधारणा अस्ति, यस्याम् संज्ञानात्मकाः, भावात्मकाः तथा क्रियात्मकाः उपलब्धयः अन्तर्भवन्ति।

**क्रो तथा क्रो** इत्येतयोः मते "शैक्षिकोपलब्धिः तां सीमां सूचयति यावत् विद्यार्थी अधिगमलक्ष्याणि प्राप्तवान् अस्ति।" तथैव **गुड** इत्यस्य मते "शैक्षिकोपलब्धिः ज्ञानस्य, कौशलस्य तथा दक्षतानाम् परिमाणं प्रकाशयति।"

**शैक्षिकोपलब्धेः प्रभावितं कुर्वन्तः प्रमुखाः कारकाः**

1.बुद्धिःतथा संज्ञानात्मक-क्षमता

2.उपलब्धि-अभिप्रेरणा

3.अध्ययन-अभ्यासाः

4.आत्म-नियमनम्

5.पारिवारिक-पर्यावरणम्

6.सामाजिक-आर्थिकस्तरः

7.विद्यालयीय-पर्यावरणम्

8.समायोजनम्

9.अभिभावक-शैली

एतेषु कारकेषु समायोजनम् एवं मनोवैज्ञानिकं चरम् अस्ति, यत् अन्यानपि बहून् कारकान् प्रभावयति।

**समायोजनस्य शैक्षिकोपलब्ध्या सह सम्बन्धः**

समायोजनस्य शैक्षिक-उपलब्ध्या सह सम्बन्धं अवगन्तुं आवश्यकं यत् अधिगमः केवलं बौद्धिक-प्रक्रिया नास्ति। अधिगमः व्यक्तेः भावात्मक-सामाजिक-व्यवहारिक-अवस्थाभिरपि प्रभावितो भवति। यदा विद्यार्थी विद्यालयीय-पर्यावरणेन सह सम्यक् रूपेण समायोजितो भवति, तदा तस्मिन् निम्नलिखिताः विशेषताः विकसिताः भवन्ति—

- अध्ययनस्य प्रति सकारात्मकः दृष्टिकोणः।
- उच्चा उपलब्धि-अभिप्रेरणा।
- आत्मविश्वासः।
- नियमितोपस्थितिः।
- श्रेष्ठः शिक्षक-विद्यार्थी सम्बन्धः।
- प्रभावी समय-प्रबन्धनम्।

विपरीततया, असमायोजनस्य अवस्थायां विद्यार्थी तनावम्, चिन्ताम्, भयम् तथा नैराश्यम् अनुभवति, यत् तस्य शैक्षिक-उपलब्धिं प्रतिकूलतया प्रभावितं करोति। समुचितं समायोजनं विद्यार्थिनः अधिगमस्य प्रक्रियायां सक्रियतया सहभागित्वं कर्तुं, नूतन-ज्ञानस्य ग्रहणं कर्तुं तथा शैक्षिक-लक्ष्याणां सिद्धिं प्राप्तुं समर्थान् करोति । अधिगमप्रक्रियायां सक्रियसहभागितायै प्रेरयति। ते कक्षाक्रियासु अधिकां रुचिं प्रदर्शयन्ति, समूहकार्येषु सहभागित्वं कुर्वन्ति तथा शैक्षिकचुनौतयः आत्मविश्वासेन सम्मुखीकुर्वन्ति।

**सम्बद्धसाहित्यस्य समीक्षा**

समायोजनस्य शैक्षिकोपलब्धेश्च विषये अनेकैः भारतीय-विदेशीयैः शोधैः महत्त्वपूर्णानि निष्कर्षाणि प्रस्तुतानि। एतेभ्यः अध्ययनभ्यः स्पष्टं भवति यत् एतयोः अवधारणयोः मध्ये महत्त्वपूर्णः सम्बन्धः विद्यते। माध्यमिकस्तरीयविद्यार्थिनां समायोजनस्य (Adjustment) तथा शैक्षिकोपलब्धेः (Academic Achievement) मध्ये प्रगाढः धनात्मकः सम्बन्धः दृश्यते। विविधेषु शोधेषु प्रतिपादितं यत् ये विद्यार्थी भावात्मकसामाजिकशैक्षिकदृष्ट्या सम्यक् समायोजनं कुर्वन्ति, तेषां शैक्षिकोपलब्धिरपि उच्चस्तरीया भवति। येषां समायोजनं दुर्बलं भवति, तेषां ध्यानकेन्द्रणशक्तिः, अधिगमक्षमता च प्रतिकूलतया प्रभाविते भवतः।

**विदेशीयाध्ययनानां समीक्षा**

वेदेशिका: स्व अध्ययने समायोजनस्य शैक्षिकोपलब्धेश्च सम्बन्ध ज्ञातम् तस्य विवरणम् अस्मिन् अनुछेदे प्रदत्तम् । अब्राहम मैसलो (1954) प्रतिपादितस्य आवश्यकतासोपानसिद्धान्तस्य अनुसारं यदा व्यक्तेः मूलभूताः आवश्यकताः परितृप्ताः भवन्ति, तदा सः उच्चतरोपलब्धीनां दिशि प्रवर्तते। अयं सिद्धान्तः समायोजनस्य उपलब्धेश्च सम्बन्धम् अप्रत्यक्षरूपेण स्पष्टीकरोति। काल रोजर्स (1961) आत्मप्रत्ययम् आत्मस्वीकृतिं च स्वस्थसमायोजनस्य

आधाररूपेण अमन्यत। तस्य मते सकारात्मकात्मप्रत्यययुक्ताः विद्यार्थी शैक्षणिकदृष्ट्या अधिकं सफलाः भवन्ति। जेम्स. एस.कॅालमैन (1966) विद्यालयीयवातावरणस्य विद्यार्थिनां उपलब्धेश्च मध्ये सम्बन्धस्य अध्ययनम् अकरोत्। अध्ययनात् ज्ञातं यत् सकारात्मकं विद्यालयीयवातावरणं विद्यार्थिनां समायोजनं वर्धयति, येन तेषां उपलब्धौ सुधारः भवति। उरी ब्रोनफेनब्रेनर (Urie Bronfen-brenner) (1979) स्वस्य पारिस्थितिकीयरूपरेखायां प्रतिपादितवान् यत् विद्यार्थिनः विकासः अनेकैः पर्यावरणीयतन्त्रैः प्रभावितो भवति। परिवारेण, विद्यालयेन तथा समुदायेन सह सकारात्मकाः अन्तःक्रियाः समायोजनम् उपलब्धिं च प्रभावितवन्ति।

**भारतीयाध्ययनानां समीक्षा**

भारतीयपरिप्रेक्ष्येऽपि अनेकैः शोधकर्तृभिः समायोजनस्य शैक्षिकोप-लब्धेश्च सम्बन्धः अध्ययनविषयत्वेन स्वीकृतः।

एस.के.मंगल (2007) स्वाध्ययने स्पष्टीकृतवान् यत् विद्यालयीयं संवेगात्मकं च समायोजनं विद्यार्थिनां उपलब्धौ महत्त्वपूर्णं प्रभावं जनयति। उत्तमसमायोजनयुक्ताः विद्यार्थी अधिकां शैक्षिकोपलब्धिं प्र्राप्नुवन्ति। शर्मा-शर्मयोः (2010) अध्ययने ज्ञातं यत् सामाजिकसमायोजनस्य शैक्षिकोपलब्धेश्च मध्ये सकारात्मकः सहसम्बन्धः विद्यते। येषां विद्यार्थिनां सामाजिकसमायोजनम् उच्चस्तरीयं आसीत्, तेषाम् उपलब्धिरपि अपेक्षया अधिका दृष्टा। सिंहस्य (2014) अध्ययनात् ज्ञातं यत् पारिवारिकसमायोजनं विद्यार्थिनां शैक्षिकोपलब्धिं प्रभावितं करोति। सहयोगात्मकं पारिवारिकवातावरणं विद्यार्थिनः समुचितसमायोजनाय सहायकं भवति, यत् अन्ततः तस्य शैक्षिकसफलतां वर्धयति ।विद्यार्थिनां शैक्षिकसफलतायाः वर्धने साहाय्यं करोति। महेश डी. मकवाना तथा डॉ. एस. एम. काजी (2014) स्व अध्ययने बालकेषु बालिकाभ्यः अपेक्षया श्रेष्ठं सामाजिकसमायोजनं दृश्यते।डॉ. सुभाष सरकार तथा सङ्गीता बनिक (2015) किशोरावस्थायां समायोजनस्य शैक्षिकोपलब्धेश्च विषये बालकबालिकयोः मध्ये विशेषः कश्चन भेदः न प्राप्तः।पूजा भगत (2015): अस्य अध्ययनस्य परिणामाः सूचयन्ति यत् माध्यमिकविद्यालयीयबालिकानां शैक्षिकसमायोजनं बालकेभ्यः न्यूनम् आसीत्।मधु गुप्ता तथा डिम्पल मेहतानी (2015): अस्मिन् अध्ययने प्रतिपादितं यत् शैक्षिकोपलब्धिः तथा लिङ्गभेदः माध्यमिकविद्यालयीयविद्यार्थिनां समायोजने महत्त्वपूर्णं प्रभावं जनयतः।वर्मा-गुप्तयोः(2018) अध्ययने ज्ञातं यत् विद्यालयीयसमायोजनं शैक्षिकोपलब्धेः महत्त्वपूर्णपूर्वानुमापकं भवति। शिक्षक-विद्यार्थिसम्बन्धाः तथा विद्यालयीयपर्यावरणं शैक्षिकोपलब्धेः स्तरं प्रभावयन्ति।डॉ. जे. ए. अकाण्डे तथा डॉ. नवानेका एन. इकेडियाशी (2018): लिङ्गभेदस्य विद्यालयप्रकारस्य वा आधारेण विद्यार्थिनां भावात्मकसमायोजने कश्चन महत्त्वपूर्णः भेदः न दृष्टः तथा च किशोरावस्थायां समायोजनस्य शैक्षिकोपलब्धेश्च मध्ये धनात्मकः सम्बन्धः प्रतिपादितः।डॉ. कोम्पल वधावन (2018): अध्ययनपरिणामेषु बालिकानां समग्रसमायोजनं बालकेभ्यः श्रेष्ठतरम् आसीत्।

उपलब्धसाहित्यस्य समीक्षया निम्नलिखितानि प्रमुखनिष्कर्षाणि प्राप्तानि—

1.समायोजनस्य शैक्षिकोपलब्धेश्च मध्ये सामान्यतः सकारात्मकः सम्बन्धः दृश्यते।

2.विद्यालयीयसमायोजनं शैक्षिकोपलब्धिं सर्वाधिकं प्रभावयन्ति।

3.पारिवारिकं सामाजिकं च समायोजनम् अप्रत्यक्षरूपेण शैक्षिकोपलब्धिं प्रभावयतः।

4.संवेगात्मक समायोजनं मानसिकस्वास्थ्यं अधिगमस्य गुणवत्तां च प्रभावयति।

5. समायोजनम् एका बहुआयामी अवधारणा अस्ति, यस्याः व्याख्या विविधैः सैद्धान्तिकदृष्टिकोणैः क्रियते।

उपलब्धानि अनुसन्धानानि सूचयन्ति यत् समायोजनस्य शैक्षिकोप-लब्धेश्च सम्बन्धः केवलं सहसम्बन्धात्मकः नास्ति, अपितु एते उभे अपि परस्परं प्रभावयतः। अतः तयोः सम्बन्धस्य सम्यगवगमनाय प्रमुखमनोवैज्ञानिकसिद्धान्तानां विश्लेषणम् अपेक्षितम्।

समायोजनस्य शैक्षिकोपलब्धेश्च सम्बन्धे प्रमुखमनोवैज्ञानिक-सिद्धान्तानां समीक्षात्मकं विश्लेषणम् समायोजनस्य शैक्षिकोपलब्धेश्च सम्बन्धं ज्ञातुं विविधाः मनोवैज्ञानिकाः शैक्षिकाश्च सिद्धान्ताः महत्त्वपूर्णमाधारं प्रददति। प्रत्येकः सिद्धान्तः समायोजनप्रक्रियायाः व्याख्यां स्वकीयदृष्टिकोणेन करोति। यद्यपि एतेषां सिद्धान्तानां मूलमान्यताः परस्परं भिन्नाः सन्ति, तथापि सर्वेऽपि एतत् स्वीकुर्वन्ति यत् व्यक्तेः मनोवैज्ञानिक-सामाजिकावस्था तस्य उपलब्धीनां स्तरं प्रभावयति। अधुना प्रमुखमनोवैज्ञानिकसिद्धान्तानां विश्लेषणं प्रस्तूयते।

**1. मनोविश्लेषणात्मक: सिद्धान्तः (Psychoanalytical Theory):**

समायोजनस्य व्याख्यां कुर्वत्सु प्रारम्भिकसिद्धान्तेषु सिग्मण्ड-फ्रायडस्य मनोविश्लेषणात्मकसिद्धान्तः अत्यन्तं महत्त्वपूर्णः मन्यते। फ्रायडस्य मते मानवव्यवहारस्य प्रमुखमूलं अचेतनमने विद्यमानाः इच्छाः, संवेगाः तथा आन्तरिकसंघर्षाः भवन्ति।

फ्रायडेन व्यक्तित्वं त्रिषु भागेषु विभक्तम्—

इड (Id)—जैविकेच्छानांवासनानांचकेन्द्रम्।

ईगो (Ego)—यथार्थपरकनिर्णयान्गृह्णातीतिसंरचना।

सुपरईगो (Superego) — नैतिकमूल्यानां सामाजिकादर्शानां च प्रतिनिधिः।

फ्रायडस्य अनुसारम् एतेषां त्रयाणां घटकानां मध्ये सामञ्जस्यस्थापनमेव समुचितसमायोजनस्य आधारः भवति। यदा व्यक्तिः स्वस्य इच्छानां, सामाजिकापेक्षाणां तथा यथार्थपरिस्थितीनां मध्ये सन्तुलनं स्थापयति, तदा तस्य समायोजनं सुदृढं भवति, यच्च तस्य शैक्षिकोपलब्धिमपि सकारात्मकतया प्रभावयति।

फ्रायड-मते समायोजनं तदैव सम्भवति यदा एतासां तिसृणां संरचनानां मध्ये सम्यक् सन्तुलनं भवति। यदा व्यक्तेः कामनाः सामाजिकमानदण्डैः सह संघर्षं कुर्वन्ति, तदा मानसिक-संघर्षः जायते। यदि व्यक्तिः एतान् संघर्षान् सफलतया समाधातुं शक्नोति, तर्हि सः समायोजितः इति कथ्यते।

**शैक्षिकोपलब्धेः सन्दर्भे मनोविश्लेषणात्मकसिद्धान्तस्य महत्त्वम्**

शैक्षिकोपलब्धेः सन्दर्भे सिग्मण्ड-फ्रायडस्य मनोविश्लेषणात्मक-सिद्धान्तस्य विशेषं महत्त्वम् अस्ति। विद्यालयीयजीवने छात्राः नानाविधानां दाबानां सामना कुर्वन्ति। परीक्षाभयम्, असफलतायाः आशङ्का, स्पर्धा तथा अभिभावकानाम् अपेक्षाः मानसिकतनावं जनयन्ति। यदि छात्रः एतान् तनावान् प्रभावकरूपेण नियन्त्रयितुं शक्नोति, तर्हि तस्य समायोजनस्तरः उत्तमः भवति तथा तस्य

शैक्षिकोपलब्धौ वृद्धिः भवति। मनोविश्लेषणात्मकदृष्टिकोणः एतत् स्पष्टयति यत् शैक्षिकी सफलता केवलं बौद्धिकक्षमतायाः परिणामः नास्ति, अपितु संवेगात्मकसन्तुलनमपि तावत् एव महत्त्वपूर्णम् अस्ति।

## 2. व्यवहारवादी सिद्धान्तः (Behavioural Theory)

व्यवहारवादः मानवव्यवहारं पर्यावरणीयोद्दीपनानां पुनर्बलनस्य च दृष्ट्या व्याख्यायति। जॉन-वॉट्सनः, इवान-पावलॉवः तथा बी. एफ. स्किनरः अस्य दृष्टिकोणस्य प्रमुखाः प्रवर्तकाः मन्यन्ते। व्यवहारवादिनां मते समायोजनं न किञ्चित् जन्मजातं गुणम्, अपितु अधिगमस्य परिणामः अस्ति। व्यक्तिः स्वानुभवानां पुनर्बलनानां च आधारेण व्यवहारं शिक्षते।

**समायोजनस्य व्यवहारवादी व्याख्या**

यदा व्यक्तेः कस्यचित् व्यवहारस्य कृते सकारात्मकं फलम् प्राप्यते, तदा सः व्यवहारः पुनः पुनः आचर्यते। विपरीततया, नकारात्मक-फलप्राप्तौ व्यवहारस्य परिवर्तनं भवति। एवं व्यक्तिः शनैः शनैः स्वपर्यावरणानुकूलं व्यवहारं विकसितयति।

**शैक्षिकोपलब्धेः सन्दर्भे व्यवहारवादीसिद्धान्तस्य महत्त्वम्**

विद्यालये अध्यापकैः प्रदत्तं प्रोत्साहनम्, पुरस्काराः, प्रशंसा तथा सकारात्मकप्रतिक्रिया विद्यार्थिनः उत्तमप्रदर्शनाय प्रेरयन्ति। उदाहरणतया—

- उत्तमाङ्कप्राप्तौ प्रशंसा।
- नियमिताध्ययनस्य कृते पुरस्कारप्रदानम्।
- श्रेष्ठकार्यस्य सार्वजनिकसम्मानः।

एते पुनर्बलनरूपाः उपायाः विद्यार्थिनां समुचितसमायोजनं वर्धयन्ति तथा तेषां शैक्षिकोपलब्धिमपि उन्नयन्ति। व्यवहारवादीदृष्ट्या समायोजनं तथा शैक्षिकोपलब्धिः अधिगमप्रक्रियायाः परस्परसंबद्धौ परिणामौस्तः। नियमितोपस्थितेःकृतेपुरस्काराः। सकारात्मकव्यवहा-रस्य कृते मान्यता।एते सर्वे पुनर्बलनप्रकाराः विद्यार्थिनां समायोजनम् तथा शैक्षिकपलब्धिं उभयथापि प्रभावितवन्ति।

## 3. संज्ञानात्मकसिद्धान्तः (Cognitive Theory)

संज्ञानात्मकदृष्टिकोणः समायोजनं व्यक्तेः मानसिकप्रक्रियाभिः, विचारैः, धारणाभिः तथा समस्यासमाधानक्षमताभिः सह सम्बद्धं पश्यति। Jean Piaget (जीन पियाजे) अस्य दृष्टिकोणस्य प्रमुखप्रवर्तकः मन्यते।

पियाजेमते व्यक्तिः स्वानुभवानाम् आधारेण मानसिकसंरचनानां निर्माणं करोति। नवीनपरिस्थितीनां सामनार्थं सः द्वे प्रक्रिये उपयुङ्क्ते—

(क)आत्मसात्करणं (Assimilation): नवीनसूचनानां पूर्वविद्यमानासु मानसिकसंरचनासु समावेशनम्।

(ख)समायोजनम् (Accommodation): नवीनपरिस्थितीनाम् अनुरूपं मानसिकसंरचनानां परिवर्तनम्।

पियाजे-मते संज्ञानात्मकविकासः एतयोः प्रक्रिययोः सन्तुलनस्य आधारेण भवति।

**शैक्षिकोपलब्धेः सन्दर्भे संज्ञानात्मकसिद्धान्तस्य महत्त्वम्**

- संज्ञानात्मकरूपेण समायोजिताः विद्यार्थिनः नवीनपरिस्थितिषु शीघ्रम् अनुकूलनं कुर्वन्ति।
- समस्यासु प्रभाविकं समाधानं प्राप्नुवन्ति।
- अधिगमस्य प्रति सकारात्मकं दृष्टिकोणं विकसितयन्ति।
- जटिलावधारणानां सम्यग् अवगमनं कुर्वन्ति।

एवं संज्ञानात्मकसमायोजनं प्रत्यक्षरूपेण शैक्षिकोपलब्धिं प्रभावितं करोति ।

## 4. मानवतावादी सिद्धान्तः (Humanistic Theory)

मानवतावादी मनोविज्ञानं व्यक्तेः सकारात्मकक्षमताः, आत्मविकासं तथा आत्मसाक्षात्कारं च विशेषरूपेण प्रतिपादयति। अब्राहम-मैस्लो तथा कार्ल-रोजर्स इति विद्वांसौ अस्य दृष्टिकोणस्य प्रमुखप्रतिनिधी स्तः।

**अब्राहम-मैस्लोस्यदृष्टिकोणः**

मैस्लो-महोदयेन आवश्यकतानां पदानुक्रमसिद्धान्ते मानवावश्यकताः पञ्चसु स्तरेषु विभक्ताः—

1.शारीरिकावश्यकताः
2.सुरक्षायाः आवश्यकता
3.प्रेम्णःसम्बद्धतायाश्च आवश्यकता
4.सम्मानस्य आवश्यकता
5. आत्मसाक्षात्कारस्य आवश्यकता

मैसलोमहोदयस्य मते निम्नस्तरीयावश्यकतानां सन्तुष्टिं विना उच्चस्तरीयलाभानां प्राप्तिः न सम्भवति।

**रोजर्सदृष्टिकोणः**

रोजर्स-महोदयःआत्मप्रत्ययम् (Self-Concept) आत्मस्वीकृतिं (Self-Acceptance) च स्वस्थसमायोजनस्य आधाररूपेण स्वीकृतवान्। तस्य मते यदा व्यक्तिः स्वात्मानं स्वीकुरुते तथा च तस्मै सकारात्मकं सामाजिकसमर्थनं प्राप्यते, तदा तस्य व्यक्तित्वस्य स्वस्थविकासः भवति।

**शैक्षिकोपलब्धेः सन्दर्भे मानवतावादिदृष्टिकोणस्य महत्त्वम्**

- आत्मविश्वासः शैक्षिकोपलब्धिं वर्धयति।
- सकारात्मकआत्मप्रत्ययःअधिगमं प्रभावयति।
- शिक्षकस्य सहायकव्यवहारः समायोजनस्य संवर्धनं करोति।
- विद्यार्थी केन्द्रिता शिक्षा शैक्षिकसफलतायाः साधने सहायकत्वं वहति।

## 5. पारिस्थितिकीसिद्धान्तः (Ecological Theory)

उरी ब्रोनफेनब्रेनर-महोदयेन प्रतिपादितः पारिस्थितिकी-प्रणाली-सिद्धान्तः आधुनिक-शिक्षामनोविज्ञाने अत्यन्तं प्रभावशाली मन्यते। अस्य सिद्धान्तस्य अनुसारं व्यक्तिविकासः केवलं तस्य वैयक्तिक-विशेषतानां परिणामः न भवति, अपितु सः विविधैः पर्यावरणीयतन्त्रैः प्रभावितो भवति।

प्रमुखतन्त्राणि

(क) सूक्ष्मतन्त्रम् (Microsystem): परिवारः, विद्यालयः, मित्रसमूहः इत्यादयः।

(ख)मध्यतन्त्रम् (Mesosystem): विविधसूक्ष्मतन्त्राणां परस्पर-संबन्धाः।

(ग) बाह्यतन्त्रम् (Ecosystem): ताः सामाजिकपरिस्थितयः यासां व्यक्तौ परोक्षप्रभावः भवति।

(घ) व्यापकतन्त्रम् (Macrosystem): संस्कृतिः, मूल्यानि, सामाजिकमान्यताश्च।

(ङ) कालतन्त्रम् (Chronosystem): कालेन सह घटमानाः परिवर्तनाः।

**शैक्षिकोपलब्धेः सन्दर्भे पारिस्थितिकीसिद्धान्तस्य महत्त्वम्**

अयं सिद्धान्तः स्पष्टतया प्रतिपादयति यत् विद्यार्थिनः शैक्षिकी उपलब्धिः केवलं तस्य वैयक्तिकसामर्थ्यस्य परिणामः न भवति। परिवारः, विद्यालयः, सामाजिकपर्यावरणम् तथा सांस्कृतिकपरिस्थितयः अपि तस्य उपलब्धिं प्रभावितं करोति। यदि परिवारः सहयोगात्मकः भवेत्, विद्यालयः प्रेरणादायकः भवेत्, सामाजिकपर्यावरणं च सकारात्मकं भवेत्, तर्हि विद्यार्थिनः समायोजनं श्रेष्ठतरं भवति तथा तस्य शैक्षिकी उपलब्धिः वर्धते।

**समकालीनपरिप्रेक्ष्ये समायोजनं शैक्षिकोपलब्धिश्च**

एकविंशतितमे शताब्देः शिक्षायाः स्वरूपं तीव्रगतिना परिवर्तितम् अस्ति। वैश्वीकरणम्, सूचना-सञ्चार-प्रौद्योगिकी, डिजिटल-शिक्षा, कृत्रिमबुद्धिमत्ता तथा वर्धमाना स्पर्धा विद्यार्थिनाम् अधिगमनुभवान् व्यापकतया प्रभावितवन्तः। एते परिवर्तनाः यत्र शिक्षायाः नूतनान् अवसरान् प्रदत्तवन्तः, तत्रैव विद्यार्थिनां समक्षम् अनेकाश्च नवीनाः चुनौतीः अपि समुत्पादितवन्तः। फलतः समायोजनस्य आवश्यकता पूर्वापेक्षया अधिकं महत्त्वपूर्णा जाता।

अद्यतनः विद्यार्थी केवलं विद्यालयीयपरिवेशपर्यन्तं सीमितः नास्ति, अपितु सः डिजिटल-आभासिकजगतः अपि सक्रियः सदस्यः अस्ति। सामाजिकमाध्यमानि, ऑनलाइन-अधिगममञ्चाः, डिजिटलसंसाधनानि तथा आभासिकसञ्चारव्यवस्था तस्य सामाजिकसम्बन्धान्, व्यवहारम् तथा अध्ययनाभ्यासान् प्रभावितवन्तः। अनेकेषु अनुसन्धानिषु ज्ञातम् अस्ति यत् प्रौद्योगिक्याः सन्तुलितः उपयोगः अधिगमं प्रभावी करोति, किन्तु अतिशयितः उपयोगः तनावम्, ध्यानविक्षेपं तथा सामाजिकपृथक्करणादीनि दोषाणि जनयति। अतः एतादृशेषु परिस्थितिषु प्रौद्योगिकीपरिवेशेन सह स्वस्थसमायोजनं शैक्षिकोपलब्धेः कृते अनिवार्यम् अस्ति।

कोविड्–19 महामारीनन्तरं शिक्षाव्यवस्थायाम् ऑनलाइन तथा मिश्रिताधिगमस्य (Blended Learning) प्रवृत्तिः वर्धिता। अनेन परिवर्तनेन विद्यार्थिनां समायोजनस्य प्रकृतिः अपि प्रभाविताभवत्। अनेके विद्यार्थिनः डिजिटलसंसाधनानां उपयोगे, स्वनियन्त्रिताधिगमे तथा सामाजिकपृथक्करणसम्बद्धासु समस्यासु सम्मुखीकृताः अभवन्। येषु विद्यार्थिषु आत्मनियमनम्, अनुकूलनक्षमता तथा सकारात्मकसमायोजनं अधिकम् आसीत्, ते नवीनपरिस्थितिषु तुलनात्मकतया श्रेष्ठं प्रदर्शनं कर्तुं समर्थाः अभवन्।

समकालीनशिक्षामनोविज्ञाने सामाजिक-भावनात्मकाधिगमस्य (Social Emotional Learning) विशेषं महत्त्वं प्रदीयते। अयं दृष्टिकोणः आत्मजागरूकता, आत्मप्रबन्धनम्, सामाजिकजागरूकता, सम्बन्धनिर्माणम् तथा उत्तरदायिनिर्णयग्रहणम् इत्यादीनां क्षमतानां विकासे बलं ददाति। एताः सर्वाः क्षमताः समायोजनप्रक्रियया प्रत्यक्षतया सम्बद्धाः सन्ति तथा शैक्षिकोपलब्धिम् अपि प्रभावितम्।

राष्ट्रीय शिक्षा नीति 2020 अपि विद्यार्थिनां समग्रविकासे, मानसिकस्वास्थ्ये, जीवनकौशलविकासे तथा अनुभवनिष्ठाधिगमे विशेषं बलं ददाति। एषा नीति स्पष्टतया प्रतिपादयति यत् शैक्षिकी सफलता केवलं परीक्षाफलपर्यन्तं सीमिता न भवेत्, अपितु विद्यार्थिषु जीवनस्य वास्तविकचुनौतीनां सम्मुखीकरणाय क्षमता अपि विकसितव्या। अयं दृष्टिकोणः समायोजनस्य शैक्षिकोपलब्ध्या सह सम्बन्धं अधिकं प्रासङ्गिकं तथा सार्थकं च करोति।

**समीक्षात्मकविमर्शः**

समायोजनस्य शैक्षिकोपलब्धेश्च सम्बन्धे उपलब्धसाहित्यस्य मनोवैज्ञानिकसिद्धान्तानां च विश्लेषणेन एतत् स्पष्टं भवति यत् उभे अवधारणे बहुआयामिके परस्परसम्बद्धे च स्तः। तथापि केचन महत्त्वपूर्णाः प्रश्नाः सन्ति येषु समीक्षात्मकदृष्ट्या चिन्तनम् अपेक्षितम् अस्ति।

प्रथमं, अधिकांशेषु परम्परागताध्ययनेषु शैक्षिकोपलब्धिः मुख्यतया परीक्षाफलानां प्राप्ताङ्कानां च आधारेण मापिता अस्ति। अयं दृष्टिकोणः सीमितः अस्ति, यतः शिक्षायाः उद्देश्यं केवलं संज्ञानात्मकोपलब्धिपर्यन्तं न सीमितम् अस्ति। सृजनात्मकता, आलोचनात्मकचिन्तनम्, समस्यासमाधानक्षमता, सामाजिकदक्षता तथा नैतिकविकासः अपि शिक्षायाः महत्त्वपूर्णाः आयामाः सन्ति। अतः समायोजनस्य उपलब्धेश्च सम्बन्धस्य अध्ययनं व्यापकशैक्षिकपरिणामानां सन्दर्भे करणीयम्।

द्वितीयं, समायोजनस्य अवधारणा सांस्कृतिकसन्दर्भैः अपि प्रभाविताऽस्ति। विभिन्नेषु समाजेषु समायोजनस्य मानदण्डाः भिन्नाः भवितुमर्हन्ति। उदाहरणतया, भारतीयसमाजे सामूहिकता, पारिवारिकसहयोगः तथा सामाजिकदायित्वबोधः महत्त्वं प्राप्नुवन्ति, यदा तु अनेकेषु पाश्चात्यसमाजेषु वैयक्तिकस्वातन्त्र्यम् आत्मनिर्णयश्च प्राधान्यं प्राप्नुतः। अतः समायोजनस्य सार्वभौमव्याख्या कर्तुं चुनौतीपूर्णम् अस्ति।

तृतीयं, समकालीनशिक्षायां वर्धमाना स्पर्धा तथा प्रदर्शनकेन्द्रितदृष्टिकोणः कदाचित् विद्यार्थिषु अनावश्यकदबावम् उत्पादयति। एतादृशासु परिस्थितिषु उच्चशैक्षिकोपलब्धिं प्राप्तवन्तः सर्वे विद्यार्थी सम्यक् समायोजिताः एव भवन्तीति न आवश्यकम्। कदाचित् उच्चोपलब्धेः पृष्ठभूमौ तनावः, चिन्ता तथा मानसिकसंघर्षः अपि विद्यमानाः भवन्ति। अतः उपलब्धिः समायोजनस्य एकमात्रसूचकः न मन्तव्यः।

चतुर्थं, समायोजनस्य शैक्षिकोपलब्धेश्च सम्बन्धः एकदिशः न मन्यते। यथा समुचितं समायोजनम् उपलब्धिं प्रभावितं करोति, तथा शैक्षिकसफलता अपि आत्मविश्वासम्, आत्मसम्मानम् तथा सामाजिकस्वीकृतिं वर्धयित्वा समायोजने सुधारं जनयति। एवं उभयोः सम्बन्धः पारस्परिकस्वभावयुक्तः अस्ति।

पञ्चमं, वर्तमानकाले मानसिकस्वास्थ्यसम्बद्धाः समस्याः विद्यार्थिनां पुरतः गम्भीरचुनौत्यः इव उद्भवन्ति। अवसादः, चिन्ता, परीक्षातनावः तथा सामाजिकदबावः समायोजनप्रक्रियाम् प्रभावितवन्तः। अतः भावी अनुसन्धानेषु मानसिकस्वास्थ्यस्य, समायोजनस्य तथा शैक्षिकोपलब्धेः अन्तःसम्बन्धानां विषये विशेषध्यानं दातव्यम्।

**शैक्षिकनिहितार्थः**

प्रस्तुतध्ययनस्य आधारेण निम्नलिखिताः शैक्षिकनिहितार्थः समुत्पद्यन्ते—

- विद्यालयेषु विद्यार्थिनां सामाजिक-भावनात्मक-मनोवैज्ञानिकविकासाय शैक्षिकोपलब्धेः सममेव महत्त्वं दातव्यम्।
- विद्यालयस्तरे परामर्श-निर्देशनसेवाः सुदृढीकर्तव्याः, येन विद्यार्थिनां समायोजनसम्बद्धानां समस्याः समये एव समाधातुं शक्येरन्।

- अध्यापकैः विद्यार्थिषु प्रति सहानुभूतिपूर्णः सहयोगात्मकश्च दृष्टिकोणः अवलम्बनीयः, येन सकारात्मकविद्यालयीयसमायोजन-नस्य संवर्धनं भवेत्।
- अभिभावकानाम् अध्यापकानां च मध्ये नियमितः संवादः स्थापनीयः, येन विद्यार्थिनां पारिवारिकविद्यालयीयसमायोजनयोः सामञ्जस्यं वर्तेत।
- सामाजिक-भावनात्मकाधिगमः विद्यालयीयपाठ्यक्रमस्य अभिन्नोऽङ्गः कर्तव्यः।
- विद्यार्थिषु तनावप्रबन्धनम्, आत्मनियमनम्, समस्यासमाधान-कौशलम् तथा जीवनकौशलविकासः विशेषतया प्रोत्साहनीयः।
- डिजिटलयुगस्य आव्हानानि दृष्ट्वा तकनीकीसमायोजनस्य डिजिटलसाक्षरतायाश्च कार्यक्रमाः सञ्चालयितव्याः।

शिक्षानीतौ विद्यालयीयकार्यक्रमेषु च मानसिकस्वास्थ्यसंवर्धनाय प्राधान्यं प्रदातव्यम् ।

**निष्कर्षः**

प्रस्तुतध्ययनस्य आधारेण एषः निष्कर्षः निष्पद्यते यत् समायोजनस्य शैक्षिकोपलब्धेश्च मध्ये घनिष्ठः, सकारात्मकः तथा गतिशीलः सम्बन्धः विद्यते। समायोजनं नाम सा क्षमता, यया व्यक्तिः स्वकीयानां आवश्यकतानाम्, आकाङ्क्षाणां तथा पर्यावरणीयापेक्षाणां मध्ये सन्तुलनं स्थापयति। अपरतः शैक्षिकोपलब्धिः अधिगमप्रक्रियायाः परिणामस्वरूपम् अर्जितानां ज्ञान-कौशल-दक्षतानां अभिव्यक्तिरस्ति। विविधमनोवैज्ञानिकसिद्धान्तानां विश्लेषणेन एतत् स्पष्टं जातं यत् समायोजनस्य प्रक्रिया केनापि एकेन दृष्टिकोणेन सम्पूर्णतया न अवगन्तुं शक्यते। मनोविश्लेषणात्मकसिद्धान्तः संवेगात्मकसन्तुलनस्य महत्त्वं प्रतिपादयति, व्यवहारवादीसिद्धान्तः पुनर्बलनस्य अधिगमस्य च महत्त्वं स्वीकुरुते, संज्ञानात्मकसिद्धान्तः मानसिकप्रक्रियाणां भूमिकां स्पष्टीकरोति, मानवतावादीदृष्टिकोणः आत्मविकासस्य आत्मसाक्षात्कारस्य च महत्त्वं प्रतिपादयति तथा पारिस्थितिकी-यसिद्धान्तः व्यक्तेः पर्यावरणस्य च मध्यवर्तिनाम् अन्तः क्रियात्मकसम्बन्धानां व्याख्यां करोति। एतेषां सर्वेषां प्रतिमानानां समन्वितविश्लेषणेन एतत् प्रदर्श्यते यत् समुचितं समायोजनं विद्यार्थिनाम् आत्मविश्वासं, प्रेरणां, मानसिकस्वास्थ्यं, सामाजिकसह-भागितां तथा अधिगमस्य गुणवत्तां सुदृढं करोति। फलतः तेषां शैक्षिकोपलब्धौ वृद्धिर्भवति। विपरीततया असमायोजनं तनावं, चिन्तां, व्यवहारगतकठिनताः तथा शैक्षिकसमस्याः जनयति। अतः वक्तुं शक्यते यत् समायोजनं शैक्षिकोपलब्धेः एकः महत्त्वपूर्णः निर्धारकः अस्ति, तथा विद्यार्थिनां समग्रविकासाय अस्य संवर्धने विशेषं ध्यानं दातव्यम्।।

**संदर्भ सूची**


- के. पी. पाण्डे (2009) नवीन शिक्षा मनोविज्ञान, विश्वविद्यालय प्रकाशन वाराणसी।
- गुप्ता, एस.पी. एवं गुप्ता, अलका (2011) शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, इलाहाबाद।
- त्रिपाठी, मधुसूदन (2016) शिक्षा दर्शन और मनोविज्ञान का विश्वकोष, प्रकाशक ओमेगा पब्लिकेशंस, नई दिल्ली।
- दुबे, मनीष एवं दुबे, विभा (2014) शिक्षा मनोविज्ञान शारदा पुस्तक भवन, इलाहाबाद।
- पाठक, आर. पी., (2007) शिक्षा मनोविज्ञान एक परिचय: राधा पब्लिकेशंस, नई दिल्ली।
- पाण्डे, के. पी., (2005) नवीन शिक्षा मनोविज्ञान, विश्वविद्यालय विश्वविद्यालय प्रकाशन वाराणसी।
- मिश्रा, महेंद्र कुमार (2011) शिक्षा मनोविज्ञान, अर्जुन पब्लिशिंग हाउस, नई दिल्ली।
- सुलेमान, मोहम्मद (2002) उच्चतर शिक्षा मनोविज्ञान, मोतीलाल बनारसी दास,नई दिल्ली।
- Aggarwal, J. C. (2015). Essentials of Educational Psychology, Vikas Publishing House, New Delhi.
- Best, J. W., & Kahn, J. V. (2016). Research in Education (10th ed.). New Delhi: Pearson Education.
- Chauhan, Gita (2023). Gender Bias in Parenting Style: Its Impact on Behaviour Deviance and Academic Achievement of Adolescent Students. https://shodhganga.inflibnet.ac.in/handle/10603/518546
- Gangwar, Shashi Bala (2024). A Study of Parenting Style in Relation to Adjustment and Educational Achievement of Secondary Level Students of BareillyDistrict. https://shodhganga.inflibnet.ac.in/handle/10603/625008
- Mangal, S. K. (2019). Advanced Educational Psychology (2nd ed.). New Delhi.
- P. Kavitha (2022). A Study on Learning Strategies and Goal Orientation in Relation to Academic Achievement of Higher Secondary School Students. https://shodhganga.inflibnet.ac.in/handle/10603/518546
- Ray, Paramita (2023). Adjustment Pattern, Socio Economic Status and Parenting Style in Relation to Academic Achievement of Truants at Secondary Level. https://shodhganga.inflibnet.ac.in/handle/10603/527410
- Sharma, R. A. (2018). Educational Psychology. Meerut: R. Lall Book Depot.
- Singh, A. K. (2017). Tests, Measurements and Research Methods in Behavioural Sciences. Patna: Bharati Bhawan.
- Skinner, B. F. (1953). Science and Human Behaviour. New York: Macmillan Woolfolk, A. (2019). Educational Psychology (14th ed.). Boston: Pearson.
- https://share.google/aimode/DtlIujW8JFrPUeuXv